# sarasvatIstotram bRihaspativirachitaM

# શ્રીસરસ્વતીસ્તોત્રં બૃહસ્પતિવિરચિતમ્

## Document Information

Text title : sarasvatIstotram

File name : sarasvatistotrabrihaspati.itx

Category : devii, sarasvatI, stotra, devI

Location : doc_devii

Author : Brihaspati

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rUdrayAmala. From stotrArNavaH 08-21

Latest update : June 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 11, 2024

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રં બૃહસ્પતિવિરચિતમ્

શ્રીગણેશાય નમઃ ।
બૃહસ્પતિરુવાચ -
સરસ્વતિ નમસ્યામિ ચેતનાં હૃદિ સંસ્થિતામ્ ।
કણ્ઠસ્થાં પદ્મયોનિં ત્વાં હ્રીઙ્કારાં સુપ્રિયાં સદા ॥ ૧॥

મતિદાં વરદાં ચૈવ સર્વકામફલપ્રદામ્ ।
કેશવસ્ય પ્રિયાં દેવીં વીણાહસ્તાં વરપ્રદામ્ ॥ ૨॥

મન્ત્રપ્રિયાં સદા હૃદ્યાં કુમતિધ્વંસકારિણીમ્ ।
સ્વપ્રકાશાં નિરાલમ્બામજ્ઞાનતિમિરાપહામ્ ॥ ૩॥

મોક્ષપ્રિયાં શુભાં નિત્યાં સુભગાં શોભનપ્રિયામ્ ।
પદ્મોપવિષ્ટાં કુણ્ડલિનીં શુક્લવસ્ત્રાં મનોહરામ્ ॥ ૪॥

આદિત્યમણ્ડલે લીનાં પ્રણમામિ જનપ્રિયામ્ ।
જ્ઞાનાકારાં જગદ્વીપાં ભક્તવિઘ્નવિનાશિનીમ્ ॥ ૫॥

ઇતિ સત્યં સ્તુતા દેવી વાગીશેન મહાત્મના ।
આત્માનં દર્શયામાસ શરદિન્દુસમપ્રભામ્ ॥ ૬॥

શ્રીસરસ્વત્યુવાચ -
વરં વૃણીષ્વ ભદ્રં ત્વં યત્તે મનસિ વર્તતે ।
બૃહસ્પતિરુવાચ -
પ્રસન્ના યદિ મે દેવિ પરં જ્ઞાનં પ્રયચ્છ મે ॥ ૭॥

શ્રીસરસ્વત્યુવાચ -
દત્તં તી નિર્મલં જ્ઞાનં કુમતિધ્વંસકારકમ્ ।
સ્તોત્રેણાનેન માં ભક્ત્યા યે સ્તુવન્તિ સદા નરાઃ ॥ ૮॥

લભન્તે પરમં જ્ઞાનં મમ તુલ્યપરાક્રમાઃ ।
કવિત્વં મત્પ્રસાદેન પ્રાપ્નુવન્તિ મનોગતમ્ ॥ ૯॥

ત્રિસન્ધ્યં પ્રયતો ભૂત્વા યસ્ત્વિમં પઠતે નરઃ ।
તસ્ય કણ્ઠે સદા વાસં કરિષ્યામિ ન સંશયઃ ॥ ૧૦॥

॥ ઇતિ શ્રીરુદ્રયામલે શ્રીબૃહસ્પતિવિરચિતં સરસ્વતીસ્તોત્રમ્
સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

There is a similar version from stotrArNavaH 08-21

## શ્રીસરસ્વતીસ્તોત્રં સિદ્ધસારસ્વતમ્

બૃહસ્પતિરુવાચ-
સરસ્વતિ નમસ્યામિ ચેતનાહૃદિ સંસ્થિતામ્ ।
કણ્ઠસ્થાં પદ્મયોનેસ્ત્વાં હ્રીં હ્રીઙ્કારપ્રિયાં તથા ॥ ૧॥

મતિદાં વરદાં ચૈવ સર્વકામફલપ્રદામ્ ।
કેશવસ્ય પ્રિયાં ભાર્યાં વીણાહસ્તાં વરપ્રદામ્ ॥ ૨॥

હ્રી હ્રી મન્ત્રામ્પ્રેયાં હૃદ્યાં કુમતિધ્વંસકારિણીમ્ ।
સ્વપ્રકાશનિરાલમ્બામજ્ઞાનતિમિરાપહામ્ ॥ ૩॥

મોભપ્રદાં શુભાં નિત્યાં શુભદા ભુવનપ્રિયામ્ ।
પદ્મસ્થિતાં કુણ્ડલિની શુક્લવસ્ત્રાં મનોરમામ્ ॥ ૪॥

આદિત્યમણ્ડલે લીનાં પ્રણમામિ જનપ્રિયામ્ ।
નિત્યવાસસ્થિતાં દેવીં વાગીશેન મહાત્મના ॥ ૫॥

આત્માનં દર્શયામાસ શરદિન્દુસમપ્રભા ।
વરં વૃણીષ્વ ભદ્રં તે યત્તે મનસિ વર્તતે ॥ ૬॥

બૃહસ્પતિરુવાચ-
પ્રસન્ના ભવ હે દેવિ દિવ્યજ્ઞાનં પ્રયચ્છ મે ।
સરસ્વત્યુવાચ-
વર્તતે નિર્મલં જ્ઞાનં કુમતિધ્વંસકારકમ્ ।
સ્તોત્રેણાનેન યો ભક્ત્યા માં સ્તુવન્તિ સદા નરઃ ॥ ૭॥

ત્રિસન્ધ્યં પ્રયતો ભૂત્વા યઃ સ્તુતિ પઠતે તથા ।
તસ્ય કણ્ઠે સદા વાસં કરિષ્યામિ ન સંશયઃ ॥ ૮॥

પ્રથમં ભારતી ચૈવ દ્વિતીયં તુ સરસ્વતી ।
તૃતીયં શારદા દેવી ચતુર્થ કંસમર્દની ॥ ૯॥

પઞ્ચમં તુ જગન્માતા ષષ્ઠં ચૈવ તુ પાર્વતી ।
સપ્તમં ચૈવ વારાહી હ્યષ્ટમં બ્રહ્મચારિણી ॥ ૧૦॥

નવમં ચૈવ કામાક્ષી દશમં બ્રહ્મપુત્રિકા ।
એકાદશં તુ લક્ષ્મીસ્તુ દ્વાદશં સુરસુન્દરી ॥ ૧૧॥

દ્વાદશૈતાનિ નામાનિ ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
તસ્ય સારસ્વતં ચૈવ ષણ્માસાદેવ સિધ્યતિ ॥ ૧૨॥

સિદ્ભસારસ્વતં સિદ્ધસારસ્વતં નામ સ્તોત્રં વક્ષ્યેઽહમુત્તમમ્ ।
ઉમા ચ ભારતી ભદ્રા વાણી ચ વિજયા જયા ॥ ૧૩॥

વાણી સર્વગતા ગૌરી કામાક્ષી કમલપ્રિયા ।
સરસ્વતી ચ કમલા માતઙ્ગી ચેતના શિવા ॥ ૧૪॥

ક્ષેમઙ્કરી શિવાનન્દી કુણ્ડલી વૈષ્ણવી તથા ।
ઐ ઇન્દ્રી મધુમતી લક્ષ્મીર્ગિરિજા શામ્ભવામ્બિકા
તારા પદ્માવતી હંસા પનવાસા મનોન્મણી ।
અપર્ણા લલિતા દેવી કૌમારી કબરી તથા ॥ ૧૬॥

શામ્ભવી મુમુખી નેત્રી ત્રિનેત્રી વિશ્વરૂપિણી ।
આર્યા મૃડાની હીઙ્કારી સાધની સુમનાશ્ચ હિ ॥ ૧૭॥

સૂક્ષ્મા પરાપરા કાર્તસ્વરવર્ણા હરિપ્રિયા ।
જ્વાલામાલિનિકા ચર્ચા કન્યા ચ કમલાસના ॥ ૧૮॥

મહાલક્ષ્મીર્મહાસિદ્ધિઃ સ્વધા સ્વાહા સુધામયી ।
ત્રિલોકપાવની ભી ત્રિસન્ધ્યા ત્રિપુરા ત્રયી ॥ ૧૯॥

ત્રિશક્તિસ્ત્રિપુરા દુર્ગા બ્રાહ્મી ત્રૈલોક્યમોહિની ।
ત્રિપુષ્કરત્રિવર્ગાદૌ ત્રિવર્ણા ત્રિસ્વધામયી ॥ ૨૦॥

ત્રિગુણા નિર્ગુણા નિત્યા નિર્વિકારા નિરઞ્જના ।
કામાક્ષી કામિની કાન્તા કામદા કલહંસગા ॥ ૨૧॥

સહજા કાલજા પ્રજ્ઞા રમા મઙ્ગલસુન્દરી ।
વાગ્વિલાસા વિશાલાક્ષી સર્વવિદ્યા સુમઙ્ગલા ॥ ૨૨॥

કાલી મહેશ્વરી ચૈવ ભૈરવી ભુવનેશ્વરી ।
અષ્ટોત્તરશતં નામ્નાં વાગ્ભત્રિળ ચપુરાર્જિતમ્ ॥ ૨૩॥

ત્રિસન્ધ્યં કીર્તયેદ્યસ્તુ સર્વસિદ્ધિં લભેત સઃ ।
આયુરારોગ્યમૈશ્વર્યં સુખ સમ્પત્તિવર્ધનમ્ ॥ ૨૪॥

ષટ્કર્મસિદ્ધિદં સ્તોત્રં સાક્ષાત્રૈલોક્યમોહનમ્ ।
સિદ્ધસારસ્વતં ચૈવ ભવેદ્વિષયનાશનમ્ ॥ ૨૫॥

॥ ઇતિ શ્રીસરસ્વતીસ્તોત્રં સિદ્ધસારસ્વતં સમ્પૂર્ણમ્ ॥

---

*sarasvatIstotram bRihaspativirachitaM*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*